National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 278-284
© 2026 NJHSR
www.sanskritarticle.com

**आनन्दमोहन सिंहः**
शोधच्छात्रः, विशिष्टाद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली-16

**Correspondence:**
**आनन्दमोहन सिंहः**
शोधच्छात्रः, विशिष्टाद्वैतवेदान्तविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली-16

# न्यासविंशतिस्तोत्रग्रन्थस्य विशदपरिचयः

**आनन्दमोहन सिंहः**

श्रीवेदान्तदेशिकवेङ्कटनाथैः विशिष्टाद्वैतवेदान्तसिद्धान्तमाध्यमेन लोकहिताय बहवो ग्रन्थाः प्रणीताः। तेषां ग्रन्थानां प्रवृत्तिः केवलं दार्शनिकसिद्धान्तप्रतिपादनपर्यन्ता न सीमिता, अपि तु श्रीवैष्णवसम्प्रदायस्य सिद्धान्तपरम्परायाः संरक्षणे, संवर्धने, प्रचारणे च तेषां महत्त्वपूर्णं योगदानं विद्यते। तत्त्वं, हितं, पुरुषार्थश्च इति त्रिविधोऽयं विचारः सर्वैः मुमुक्षुभिः सम्यगवगन्तव्यः। पुरुषार्थचतुष्टये धर्मार्थकाममोक्षेषु मोक्ष एव परमपुरुषार्थत्वेन स्वीकृतः। तस्य च मोक्षस्य प्राप्त्यर्थं पूर्वाचार्यैः श्रुतीनां, स्मृतीनां, श्रुतिस्मृत्यविरुद्धानाम् आगमग्रन्थानां, पाञ्चरात्रादीनाम् आगमानां तथा द्वादशदिव्यसूरीणां वाङ्मयस्य च प्रमाणतयाऽऽश्रयणं कृतम् ।

एतेषामेव सिद्धान्तानां सम्प्रदायपरम्परया संरक्षणं संवर्धनं च जातम् । मोक्षप्राप्तेः विशिष्टोपायत्वेन तेषां वाक्यामृतस्य महत्त्वं विशेषतया प्रतिपादितम्। भगवान् रामानुजाचार्योऽपि स्वकीयस्य ब्रह्मसूत्रश्रीभाष्यस्य प्रतिज्ञायां पूर्वाचार्यसम्मतमार्गमनुसृत्य ब्रह्मसूत्रव्याख्यां करिष्यतीति स्पष्टतया प्रतिज्ञातवान् ।[1] वेदान्ततत्त्वज्ञानं पूर्वाचार्यैः सम्यक् संरक्षितम् अस्ति तथा च तद् बहुमतिव्याघाताद् दूरवर्तितया प्रतिष्ठितमिति तत्र प्रतिपाद्यते।[2]

ब्रह्मसूत्रस्य विवेचनप्रसङ्गे भगवद्बोधायनप्रणीतवृत्तेः संक्षिप्तरूपेण पूर्वाचार्यैः परम्परया संरक्षणं कृतमिति ज्ञायते। तेषां वाक्यानां वाक्यार्थानां च विस्तीर्णत्वात् अल्पप्रज्ञैः तेषामवगमनं दुष्करमभवत्। अतएव दिव्यसूरिप्रभृतिभिराचार्यैः वेदान्ततत्त्वज्ञानस्य, भक्तिमार्गस्य, प्रपत्तिमार्गस्य च सुलभबोधाय दिव्यप्रबन्धाः प्रणीताः। एतेषामेव आधारभूतानां तत्त्वानां परम्परया भगवान् रामानुजाचार्यो ब्रह्मसूत्रस्य यथाशास्त्रं व्याख्यानं कृतवान् ।

अतः मोक्षप्राप्त्युपायत्वेन भक्तेः प्रपत्तेश्च स्वरूपं श्रीवैष्णवसम्प्रदाये रहस्यरूपेण प्रतिपादितम् । भक्तेः प्रपत्तेश्च ज्ञानस्वरूपत्वं सम्प्रदायस्य रहस्यग्रन्थेषु कालक्षेपपरम्परासु च विशदतया प्रतिपादितम् । तथापि केवलं तयोः स्वरूपज्ञानमात्रेण प्रयोजनसिद्धिर्न भवति। तयोः यथाविध्यनुष्ठानमेव मोक्षप्राप्तेः प्रमुखं साधनम्। भगवत्प्रसादद्वारा भक्तिप्रपत्त्योः सम्यगनुष्ठानमेव मोक्षफलप्रदं भवतीति पूर्वाचार्यपरम्परायां दृढः सिद्धान्तः।

तत्त्वस्य जिज्ञासा तत्त्वबुभुत्सोः पुरुषस्य स्वाभाविकी प्रवृत्तिः। जिज्ञासया विचारः, विचारेण तत्त्वज्ञानम्, तत्त्वज्ञानेन तत्त्वप्राप्तेः अभिलाषः, ततः तदुपायानुष्ठाने प्रवृत्तिश्च क्रमशः जायते। अत एव ज्ञानयोगस्य साधनत्वेन तत्त्वविषयकविचारस्य महत्त्वं प्रतिपाद्यते। यद्विषयकः विचारः पुनः पुनः क्रियते, तद्विषयकं तत्त्वं दृढतररूपेण अवगम्यते। श्रुतिष्वपि यद्विषयकस्य चिन्तनस्याभ्यासः क्रियते, तद्विषयकं ज्ञानं क्रमशः सुदृढं भवतीति प्रतिपादितम्।

अतः मुमुक्षुणा तादृशस्यैव तत्त्वस्य जिज्ञासा करणीयं यस्य यथार्थावबोधेन परमपुरुषार्थस्य मोक्षस्य प्राप्तिः सम्भवेत्। भक्तेः प्रपत्तेश्च मोक्षोपायत्वं निश्चित्य तयोः स्वरूपस्य, अङ्गानां, अनुष्ठानक्रमस्य च

सम्यगवबोधनाय विचारः करणीयः। केवलं भक्तिप्रपत्त्योः स्वरूपज्ञानं पर्याप्तं न भवति; तदनुष्ठानमेव परमप्रयोजनसाधकं भवति। अत एव पूर्वाचार्यैः स्वयं भक्तिप्रपत्त्योरनुष्ठानं कृतं तथा स्वाश्रितानां कृतेऽपि तयोरनुष्ठानमार्गः उपदिष्टः।

भगवद्रामानुजाचार्यस्य गीताभाष्येऽपि केवलं कर्तव्यस्य ज्ञानमेव पर्याप्तं न भवति, अपि तु तज्ज्ञानस्य फलरूपेण तदनुष्ठानमेव अपेक्षितमिति भावः प्रतिपादितः।[3] अतः सर्वैः मुमुक्षुभिः भक्तेः प्रपत्तेश्च यथाशास्त्रमनुष्ठानं करणीयमिति पूर्वाचार्यसम्मतः सिद्धान्तः।

पूर्वाचार्याणां भक्तिप्रपत्तिविषयकः निश्चयो निर्विवादः आसीत्। किन्तु कालक्रमेण विषयवासनया मलिनीकृतान्तःकरणानां बुद्धौ प्रपत्तेः भक्तेश्च स्वरूपविषये विपर्ययो जातः। संशयः, अन्यथाज्ञानं, विपरीतज्ञानं च तयोः स्वरूपनिर्णये महान् क्लेशः समुत्पादयत् । फलतः भक्तिप्रपत्त्योः यथार्थस्वरूपस्य पुनः समीचीनरूपेण विवेचनस्य आवश्यकता समुत्पन्ना।

वेदान्तदर्शनस्य विविधेषु सम्प्रदायेषु जीवस्वरूपं, जीवबहुत्वम्, जीवस्य विभुत्वम्, अद्वैतवादः इत्यादयः बहवो विषयाः स्वतन्त्रतया विविच्यन्ते। तेषां विषये अद्यापि दार्शनिकमतभेदाः सर्वथा नोपशान्ताः। यत्रैकस्मिन् विषयवस्तुनि बहवः परस्परविरोधिनः पक्षाः प्रतिपाद्यन्ते, तत्र युक्तितर्कप्रमाणैः निश्चितार्थस्य स्थापनं आवश्यकं भवति। अन्यथा संशयात्मकज्ञानस्य, अन्यथाज्ञानस्य वा विपरीतज्ञानस्य सम्भावना निवारयितुं न शक्यते।

विशिष्टाद्वैतवेदान्ते तु केवलं तत्त्वचर्चायाः अपेक्षया भक्तेः प्रपत्तेश्च अनुष्ठानपक्षस्य विशेषः प्राधान्यं दृश्यते । आचार्ययामुनमुनिनापि स्तोत्ररत्ने-

**अकिञ्चनोऽनन्यगतिः शरण्य त्वत्पादमूलं शरणं प्रपद्ये।**[4]

इत्यनेन आत्मनः अकिञ्चनत्वम् अनन्यगतित्वं च प्रतिपाद्य भगवत्पादमूलशरणागतेः भावः प्रकाश्यते ।

विशिष्टाद्वैतसम्प्रदाये रहस्यस्वरूपाणां विषयाणां गोपनीयता विशेषेण स्वीकृता। स्वज्ञातस्य सर्वस्य सत्यस्य सर्वत्र प्रकाशनमेव कर्तव्यमिति नियमो नास्ति। यद् वस्तु रहस्यरूपं भवति, तस्य यथोचितं गोपनीयत्वमपेक्षितम्। ऋषिभिः महर्षिभिश्चापि रहस्यसंरक्षणस्य महत्त्वं प्रतिपादितम्। रहसि इत्यस्य एकान्ते इत्यर्थः; अतः रहस्यविषयाणामुपदेशोऽपि योग्याय शिष्याय एकान्त एव करणीयः।

भक्तेः सम्पादनं मन्त्रादिसाधनद्वारा भवति। मन्त्राणां च गोपनीयत्वं शास्त्रेषु प्रतिपादितमेव। तस्माद् मन्त्रः प्रयत्नेन संरक्षितव्य इति सम्प्रदायपरम्परायां प्रसिद्धम्।[5] मन्त्रस्य अनधिकृतश्रवणं तस्य फलप्राप्तौ प्रतिबन्धकं भवतीति पूर्वाचार्यैः स्पष्टतया प्रतिपादितम्—

**यदृच्छया श्रुतो मन्त्रःछन्नेनाथच्छलेन वा ।**
**पत्रेक्षितो वा व्यर्थः स्यात् प्रत्युतानर्थदो भवेत् ।।**[6]

अस्य तात्पर्यमिदं यत् यदृच्छया श्रुतः, छद्मना श्रुतः, छलपूर्वकं श्रुतः अथवा पत्रादौ लिखितं दृष्ट्वा अधीतश्च मन्त्रः यथोचितं फलप्रदत्वं न प्राप्नोति, प्रत्युत अनर्थस्यापि कारणं भवितुमर्हति। अतः मन्त्रस्य गुरुमुखात् विधिपूर्वकं ग्रहणमेव शास्त्रसम्मतं भवति।

मन्त्रस्य अक्षराणां, तदर्थानां, आनुपूर्व्याः तथा मन्त्रदेवतायाः च यथार्थज्ञानं केवलबौद्धिकपरिज्ञानरूपं न, अपि तु अनुभवरूपेण फलदायकं भवति। प्रणवः सर्वेषां मन्त्राणां मध्ये विशेषमहत्त्वसमन्वितः। मन्त्रान्तरेष्वपि तस्य अङ्गभावः प्रतिपादितः। शास्त्रे प्रणवस्य आत्मत्वं तथा प्रणवेन आत्मनः परमात्मना योगः प्रतिपादितः। शरणागतेः प्रपत्तेश्च प्रसङ्गेऽपि प्रणवस्य विशेषः स्वीकार्यः।[7]

प्रणवे अकारः, उकारः, मकारश्चेति त्रयो वर्णाः सन्ति। तेषां तात्त्विकार्थनिर्णये विभिन्नेषु सम्प्रदायेषु मतभेदाः सन्ति। माण्डूक्योपनिषदि प्रणवस्य महत्त्वं विशदतया प्रतिपादितम्। विशिष्टाद्वैतपरम्परायां तु प्रणवस्य अकारस्य नारायणवाचकत्वं, मकारस्य जीववाचकत्वम्, उकारस्य उभयसम्बन्धविशेष-प्रतिपादकत्वं च स्वीकृतम्। तदेव भावं प्रसिद्धप्रणवव्याख्यायामपि द्रष्टुं शक्यते-

**अकारेणोच्यते विष्णुः सर्वलोकेश्वरो हरिः ।**
**उद्धृता विष्णुना लक्ष्मीरुकारेणोच्यते तथा ।।**
**मकारस्तु तयोर्दास इति प्रणवलक्षणम् ।।**

अर्थतः अकारः सर्वलोकेश्वरस्य भगवतो विष्णोर्वाचकः, उकारः भगवतः सहधर्मचारिण्याः श्रीलक्ष्म्याः वाचकः, मकारश्च तयोः शेषभूतस्य जीवस्य दासत्वं प्रतिपादयति। एवं प्रणवस्य स्वरूपे परमात्म-श्री-जीवसम्बन्धस्य सूक्ष्मतया प्रतिपादनं दृश्यते। विशिष्टा-द्वैतसम्प्रदायस्य रहस्यत्रयपरम्परायां प्रणवस्य व्याकरणात्मकस्वरूप-विषयेऽपि विशिष्टा व्याख्या दृश्यते। अकारस्य लुप्तविभक्तिकत्वं स्वीकृत्य चतुर्थ्यर्थस्य द्योतनं प्रतिपाद्यते। तदर्थमेव उपबृंहणरूपेण-

**हविर्गृहीत्वात्मस्वरूपं वसुरण्येति मन्त्रतः ।**
**जुहुयात् प्रणवेनाग्नौ अच्युताख्ये सनातने ।।**

इत्यादि वचनस्योपयोगः क्रियते। अनेन प्रकारेण प्रणवस्य सार्वविभक्तिकत्वं वा लुप्तविभक्तिकत्वं वा विवक्षितमिति व्याख्या-तृभिरभिप्रेतम्। अन्ततः जीवस्य परमात्मनश्च भेदः प्रणवस्य तात्त्विकप्रतिपाद्यविषयेष्वन्यतम इति विशिष्टाद्वैतिनामभिप्रायः।

शरणागतेः, अथवा प्रपत्तेः, स्वरूपविचारे आनुकूल्यसङ्कल्पः, प्रातिकूल्यवर्जनम्, रक्षिष्यतीति विश्वासः, गोप्तृत्ववरणम्, आत्मनिक्षेपः, कार्पण्यमिति षडङ्गानि प्रतिपाद्यन्ते।[8] एतानि प्रपत्तेः स्वरूपनिर्माणे अत्यन्तमहत्त्वपूर्णानि। तेषां पूर्वकृत्यत्वम्, उत्तरकृत्येषु च तेषां प्रभावः सम्प्रदायग्रन्थेषु विशदतया प्रतिपादितः।

एवं न्यासविंशतिग्रन्थे प्रपत्तेः सूक्ष्मस्वरूपं, तदङ्गानि, तदनुष्ठानक्रमः, तस्याः प्रमाणभूतत्वं, फलजनकत्वं च क्रमशः विविच्यते। आचार्यवेदान्तदेशिकस्य प्रयत्नः केवलं सिद्धान्तप्रतिपादनपरः न, अपि तु पूर्वाचार्यपरम्परया प्राप्तस्य रहस्यार्थस्य संरक्षणपूर्वकं मुमुक्षूणां सम्यगवबोधाय तस्य व्यवस्थितरूपेण प्रस्तुतीकरणपरः।

## न्यासविंशतेः स्वरूपम्

न्यासविंशतिः इति नामकरणस्य कारणं ग्रन्थे विद्यमानानां विंशतिश्लोकानां संख्या। **न्यासः** इत्यस्य समर्पणम्, शरणागतिः, प्रपत्तिः इत्यादयः पर्यायार्थाः। अतः विंशतिश्लोकसमन्वितत्वात्

**न्यासविंशतिः** इत्यस्य नाम्नः सार्थकता सुस्पष्टा। सर्वेऽपि श्लोकाः स्रग्धराछन्दसा निबद्धाः। अस्मिन् ग्रन्थे शरणागतेः स्वरूपसम्बद्धाः अनेकाः महत्त्वपूर्णाः विषयाः श्रुतिसम्मततया, स्मृतिसम्मततया, आचारसम्मततया तथा सम्प्रदायसम्मततया क्रमबद्धरूपेण प्रतिपादिताः ।

**आचार्यस्वरूपविवेचनम्**

प्रथमश्लोके शरणागतेः सफलतायाः अनिवार्योपकारकरूपेण आचार्यस्य स्वरूपं निरूपितम् । आचार्यपुरुषकारं विना शरणागतेः पूर्णफलप्राप्तिर्न सम्भवतीति श्रीवैष्णवसम्प्रदायस्य दृढः सिद्धान्तः। भगवत्प्राप्तये विविधा उपायाः शास्त्रेषु प्रतिपादिताः सन्ति, तथापि सुलभत्वेन प्रपत्तेः विशेषमहत्त्वं विद्यते । तस्याः प्रपत्तेः विधिपूर्वकं कारयितृत्वम् आचार्यस्य प्रधानम् उत्तरदायित्वम् ।

अतः आचार्यः कः, कीदृशगुणसम्पन्नः आचार्यः शिष्यस्य शरणागतेः सफलतायै समर्थो भवति इति प्रश्नस्य समाधानं प्रथमश्लोक एव करोति। शास्त्रविहितलक्षणसम्पन्नः, स्वयमनुष्ठितप्रपत्तिः, स्वानुष्ठानेन सफलतामुपगतश्च आचार्य एव शिष्यस्य कृते योग्यः मार्गदर्शकः। यथा भग्ननौकायाम् आश्रितः पुरुषः पारं न गन्तुं शक्नोति, तथैव ज्ञानविहीनस्य गुरोराश्रयणेन मोक्षप्राप्तिर्न सम्भवतीति दृष्टान्तेनोक्तम्।[9]

**आचार्यभक्तेः महत्त्वम्**

केवलम् आचार्यस्य शास्त्रसम्पन्नत्वं पर्याप्तं न भवति; तस्मिन् भगवद्गुणानां प्रतिफलनमपि अपेक्षितम्। यः पुरुषः निरन्तरं भगवन्तं चिन्तयति, ध्यायति, स्मरति, उपासते च, तस्मिन् भगवद्गुणानां प्रतिबिम्बनं स्वाभाविकतया भवति। ब्रह्मनिष्ठे आचार्ये ब्रह्मगुणानां प्रकाशोऽपि एवं भवति।

भगवति विद्यमानाः कल्याणगुणाः आचार्यरूपे दर्पणे प्रतिबिम्बिता इव शिष्यस्य पुरतः प्रकाशन्ते। अतः भगवत्प्राप्तये भगवद्भक्तिरिव आचार्यभक्तिरपि परमापेक्षिता। मन्त्रे, मन्त्रदेवतायां, मन्त्रप्रदातरि गुरौ च समानभक्तेः कर्तव्यत्वं शास्त्रे प्रतिपादितम्-

**मन्त्रे तद्देवतायां तथा मन्त्रप्रदे गुरौ ।**
**त्रिषु भक्तिः सदा कार्या सा हि प्रथमसाधनम् ।।**[10]

तथैव श्वेताश्वतरोपनिषदि देवगुरुभक्त्योः समत्वं प्रतिपाद्यते-

**यस्य देवे यथा भक्तिः यथा देवे तथा गुरौ ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ।।**[11]

**शिष्यस्य पात्रताविचारः**

आचार्यस्य सर्वगुणसम्पन्नत्वमात्रेण कार्यसिद्धिर्न भवति। यथा सुस्थिरं पात्रमेव धारितं द्रव्यं सुरक्षितं स्थापयितुं शक्नोति, तथैव आचार्योपदिष्टज्ञानस्य संरक्षणाय शिष्यस्यापि पात्रता अनिवार्या। अतः आचार्येण शिष्यस्य स्वभावः, बुद्धिः, श्रद्धा, विनयः, वैराग्यम् इत्यादयः परीक्ष्य तस्य योग्यतां सम्पादयितव्या।

तृतीयश्लोके[12] आचार्यवेदान्तदेशिकेन योग्यशिष्यस्य स्वरूपं निरूपितम्। सम्प्रदायपरम्परायां दीर्घकालं शिष्यस्य आचारविचार-स्वभावादीनां परीक्षणं कृत्वैव रहस्योपदेशः करणीय इति सिद्धान्तस्य स्मरणमत्र भवति।

**रहस्योपदेशस्य स्वरूपम्**

रहस्यविषयाणामुपदेशः सामान्यप्रवचनवत् सर्वेषां समक्षं न करणीयः। अध्यात्मशास्त्रस्य प्रमुखांशाः रहस्यस्वरूपाः; अतः योग्याय शिष्याय एकान्ते आचार्येण तत्त्वहितपुरुषार्थानां यथाविधि उपदेशः करणीयः। आचार्यस्य कर्तव्यं केवलं शास्त्रज्ञानस्य प्रदानं न, अपि तु तस्य ज्ञानस्य शिष्यहृदये दृढप्रतिष्ठापनमपि। तत्त्वं ज्ञानस्वरूपम्। यत् ज्ञानं बन्धनस्य निवृत्तिकारणं भवति, तदेव यथार्थज्ञानम्। हितरूपेण भक्तिः प्रपत्तिश्च प्रतिपाद्येते। पुरुषार्थचतुष्टयस्य धर्मार्थकाममोक्षात्मकत्वं सर्वशास्त्रप्रसिद्धम्।

उपनिषदपि आत्मतत्त्वस्य अवगमने श्रवण-मनन-निदिध्यासनक्रमं प्रतिपादयति-

**आत्मा वा अरे द्रष्टव्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।**[13]

अतः प्रथमम् आचार्यमुखात् शास्त्रार्थस्य श्रवणम्, ततः श्रुतार्थस्य युक्तिपूर्वकं मननम्, अनन्तरं तस्य दृढनिदिध्यासनं च आवश्यकम्। श्रवणाभावे मननं, मननाभावे च निदिध्यासनं न सम्यगुपपद्यते।

**मोक्षस्य परमपुरुषार्थत्वम्**

मोक्षः परमपुरुषार्थ इति सर्वेषामास्तिकदर्शनानां सामान्यतः स्वीकृतः सिद्धान्तः। यद्यपि मोक्षस्य स्वरूपविषये दर्शनभेदेन मतान्तराणि दृश्यन्ते, तथापि परमोपादेयत्वं तस्य निर्विवादम्। विशिष्टाद्वैत-सम्प्रदायानुसारं मोक्षस्योपायौ भक्तिः प्रपत्तिश्च।

भक्तिः तैलधारावद् अविच्छिन्नस्मृतिसन्तानरूपा ।[14] प्रपत्तिस्तु दृढाध्यवसायपूर्विका। भक्तियोगस्य निरन्तरानुष्ठानापेक्षा विद्यते, प्रपत्तेस्तु सकृदनुष्ठानमेव पर्याप्तम् ।[15] भक्तियोगस्य साधनसम्पत्तौ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानादीनाम् अपेक्षा भवति। अतः शक्तिमतः पुरुषस्य भक्तियोगानुष्ठानं सम्भवति। अशक्तस्य तु प्रपत्तिः सुगमोपायत्वेन प्रतिपाद्यते। अयं भावः पञ्चमश्लोके[16] विशेषेण प्रकाश्यते।

**प्रपत्तेः वैदिकप्रामाण्यम्**

भक्तेः मोक्षोपायत्वं दार्शनिकग्रन्थेषु बहुधा प्रतिपादितम्, किन्तु प्रपत्तेः मोक्षोपायत्वं तादृशेन विस्ताररूपेण सर्वत्र न दृश्यते। अतः प्रपत्तेः प्रमाणिकत्वं वेद-स्मृति-इतिहास-पुराणादिप्रमाणैः समर्थनीयम्। आचार्यवेदान्तदेशिकेन षष्ठश्लोके प्रपत्तेः वैदिकप्रामाण्यं विशिष्टतया प्रतिपादितम्।[17]

प्रपत्तिः न्यासविद्यारूपेण वेदेषु प्रतिपादितैव। स्मृतिषु, इतिहासेषु, विशेषतः श्रीमद्रामायणे, भगवद्गीतायां च शरणागतेः विविधाः प्रसङ्गाः दृश्यन्ते। अतः प्रपत्तिः नूतनकल्पना न, अपि तु प्राचीनवैदिकसम्प्रदायस्यैव अभिन्नाङ्गम् इति अस्मिन् प्रसङ्गे प्रतिपाद्यते।

**महाविश्वासस्य स्वरूपम्**

प्रपत्तेः षडङ्गेषु रक्षिष्यतीति विश्वासस्य विशेषमहत्त्वं विद्यते। आनुकूल्यसङ्कल्पः, प्रातिकूल्यवर्जनम्, गोप्तृत्ववरणम्, आत्मनिक्षेपः,

कार्पण्यं च यथा प्रपत्तेः अङ्गत्वेन प्रतिपाद्यन्ते, तथैव रक्षिष्यतीति विश्वासोऽपि तस्याः अनिवार्यमङ्गम्। किन्तु सामान्यविश्वासस्य अपेक्षया महाविश्वासः इति विशेषणस्य प्रयोजनं विचारणीयम् ।

आचार्यवेदान्तदेशिकेन सप्तमश्लोके[18] महाविश्वासस्य स्वरूपं तथा प्रपत्त्यङ्गत्वस्य औचित्यं निरूपितम्। भगवता निश्चिततया रक्षितव्यतायां दृढविश्वास एव प्रपन्नस्य चित्ते भगवदाश्रयस्य परमप्रकाशरूपेण प्रतिष्ठते।

**प्रपत्तेः फलजनकत्वम्**

मोक्षोपायत्वेन स्वीकृतस्य साधनस्य फलजनकत्वं प्रमाणैः समर्थितं भवितुमर्हति। केवलं साधनत्वेन कल्पितस्य उपायस्य मोक्षफलप्रदत्वं निश्चयेन अवगन्तव्यम्। प्रपत्तेः मोक्षफलजनकत्वं शास्त्रैः, शास्त्रकारैः, सम्प्रदायपरम्परया च दृढतया समर्थितम्।

इतिहासेष्वपि प्रपन्नानां मोक्षप्राप्तिः बहुधा वर्णिता। अतः विधिपूर्वकम् अनुष्ठिता प्रपत्तिः निष्फला न भवति; सा भगवत्प्रसादद्वारा मोक्षफलस्य जननी भवतीति अष्टमश्लोकस्य तात्पर्यम् ।[19]

**प्रपत्तेः साक्षान्मोक्षोपायत्वम्**

शास्त्रेषु कर्मयोगः, ज्ञानयोगः, भक्तियोगः इत्यादयः मोक्षसाधनरूपेण प्रतिपादिताः। तेषां मध्ये कर्मयोगस्य ज्ञानभक्त्यादिद्वारा परम्परया मोक्षसाधनत्वं, ज्ञानयोगस्य भक्तिद्वारा मोक्षसाधनत्वं च प्रतिपाद्यते। भक्तिस्तु साक्षादेव मोक्षोपायत्वेन स्वीकृता। तद्वदेव प्रपत्तिरपि साक्षान्मोक्षोपायत्वेन विशिष्टाद्वैतसम्प्रदाये प्रतिष्ठिता ।

प्रपत्तेः द्वैविध्यमपि सम्प्रदायग्रन्थेषु दृश्यते—अङ्गिप्रपत्तिः तथा अङ्गप्रपत्तिः। अङ्गिप्रपत्तिः आत्मनिक्षेपरूपा, अङ्गप्रपत्तिस्तु भक्तेः स्थैर्यसम्पादनाय अनुष्ठीयमाना प्रपत्तिः। अतः भक्त्यङ्गभूता प्रपत्तिः भक्तेः साधिका भवति, न तु साक्षात् मोक्षस्य। अङ्गिरूपा प्रपत्तिस्तु साक्षादेव मोक्षोपायत्वेन स्वीकृता।

**ब्रह्मसूत्रे प्रपत्तेः प्रामाण्यम्**

वेदान्तशास्त्रस्य प्रमुखानि त्रयः प्रस्थानानि—श्रुतिप्रस्थानरूपाः उपनिषदः, स्मृतिप्रस्थानरूपा भगवद्गीता, न्यायप्रस्थानरूपं च ब्रह्मसूत्रम्। ब्रह्मसूत्रस्य वेदान्तदर्शनपरम्परायां विशेषमहत्त्वं विद्यते। प्रपत्तेः प्रत्यक्षरूपेण ब्रह्मसूत्रेषु प्रतिपादनं न दृश्यत इति केचन पूर्वपक्षं स्थापयन्ति। तस्य समाधानाय आचार्यवेदान्तदेशिकः दशमश्लोके[20] ब्रह्मसूत्रपरम्परायामपि प्रपत्तेः उपायत्वस्य समर्थनं प्रमाणपूर्वकं करोति। प्रपत्तेः रहस्यस्वरूपत्वाद् तस्याः प्रत्यक्षनिर्देशाभावः सम्भाव्यते; तथापि तत्त्वतः तस्याः प्रामाण्यम् असन्दिग्धम् इति तत्र प्रतिपाद्यते।

**प्रपत्तेः षडङ्गानि**

प्रपत्तेः षडङ्गानि शास्त्रसम्मतानि[21]-

१.आनुकूल्यस्य सङ्कल्पः।

२. प्रातिकूल्यस्य वर्जनम्।

३. रक्षिष्यतीति विश्वासः।

४. गोप्तृत्ववरणम्।

५. आत्मनिक्षेपः।

६. कार्पण्यम्।

एतानि षडङ्गानि प्रपत्तेः स्वरूपसम्पत्तये अनिवार्याणि। तेषाम् अभावे प्रपत्तेः पूर्णता न सिध्यतीति शास्त्रकाराः सम्प्रदायाचार्याश्च प्रतिपादयन्ति। लोकव्यवहारेऽपि यदा कश्चित् पुरुषः कार्यसिद्धये अन्यं पुरुषं शरणं गच्छति, तदा तस्य आश्रयग्रहणस्य सफलतायै विश्वासः, स्वकीयासमर्थतायाः स्वीकारः, शरणदातुः संरक्षणस्य वरणम् इत्यादीनाम् अपेक्षा भवति। अतः लौकिकदृष्ट्यापि प्रपत्तेः षडङ्गत्वं साधारणतया अवगन्तुं शक्यते।

**प्रपत्त्यङ्गविषयकमतभेदः**

प्रत्येकं शास्त्रीयविषयस्य सूक्ष्मविचारे मतभेदसम्भावना स्वाभाविकी। प्रपत्त्यङ्गानामपि स्वरूपे सम्प्रदायभेदेन मतान्तराणि दृश्यन्ते। एतेषां मतभेदानां कारणेन अनुष्ठाने संशयः जायते; संशयस्य निवारणं विना मुमुक्षोः निःसन्दिग्धप्रवृत्तिः न सम्भवति ।

केचन आत्मनिक्षेपं प्रपत्तेः अङ्गत्वेन मन्यन्ते, अन्ये तु आत्मनिक्षेपमेव प्रपत्तेः स्वरूपमिति प्रतिपादयन्ति। केचन पञ्चाङ्गप्रपत्तिम्, अन्ये षडङ्गप्रपत्तिं च समर्थयन्ति। आचार्यवेदान्तदेशिकः द्वादशश्लोके[22] एतेषां मतभेदानां सम्यग्विचारं कृत्वा तेषां समाधानं प्रस्तौति।

**अपूर्णप्रपत्तेः फलसम्भावना**

भक्तिप्रपत्तिभ्यां प्रसन्नः भगवान् मुमुक्षवे मोक्षं प्रददातीति शास्त्रसम्मतः सिद्धान्तः[23]। लौकिकव्यवहारेऽपि शरणागतस्य प्रपत्तौ किञ्चिद् वैकल्यम् उपस्थितेऽपि शरणदातुः कृपया कार्यसिद्धिः कदाचित् सम्भवति। तद्वदेव भगवद्विषयिण्यां प्रपत्तावपि भगवत्कृपया किञ्चिद् वैकल्यम् अस्याः फलप्राप्तेः सर्वथा प्रतिबन्धकं न भवतीति त्रयोदशश्लोकस्य[24] तात्पर्यम्। अस्यां दृष्ट्या दृष्टप्रपत्तिः अदृष्टप्रपत्तिश्चेति भेदोऽपि विवेचनीयः।

**भगवद्विषयिण्याः वैदिकशरणागतेः वैशिष्ट्यम्**

लौकिकवैदिकयोः साधनयोः स्वरूपभेदः स्वाभाविकः। प्रत्येकं साधनस्य स्वकीयाः विशेषाः भवन्ति। तद्वदेव सामान्यलोक-प्रसिद्धशरणागतेः अपेक्षया भगवद्विषयिणी वैदिकी शरणागति-र्विशिष्टा भवति। तस्याः विशिष्टस्वरूपं, प्रयोजनं, भगवत्सम्बन्धश्च चतुर्दशश्लोके[25] आचार्यवेदान्तदेशिकेन विविच्यते।

**प्रपन्नस्य वर्णाश्रमधर्मानुष्ठानम्**

प्रपत्तेः अनुष्ठानानन्तरं वर्णाश्रमधर्माणां परित्यागः करणीय इति सम्भावना केषाञ्चिद् मनसि जायते। किन्तु श्रीवैष्णवसम्प्रदायस्य सिद्धान्तानुसारं प्रपन्नेनापि शास्त्रविहिताः नित्यनैमित्तिकधर्माः अनुष्ठेयाः। केवलं काम्यकर्मणां तथा निषिद्धकर्मणां परित्यागः अपेक्षितः।

आनुकूल्यस्य सङ्कल्पः तथा प्रातिकूल्यस्य वर्जनम् इत्येताभ्या-मङ्गाभ्यां वर्णाश्रमधर्माणाम् अनुष्ठेयत्वं समर्थ्यते। भगवदाज्ञारूप-त्वात् प्रपन्नस्यापि तेषामनुष्ठानं कर्तव्यमेव। अतः प्रपत्तिः वैदिककर्तव्यधर्मानां सर्वथा निषेधिका न, अपि तु भगवदनुकूल-धर्मानुष्ठानस्यैव सुदृढीकरणरूपा ।

**सिद्धोपायः साध्योपायश्च**

उपायः साधनम् इत्यर्थः। स च द्विविधः—सिद्धोपायः साध्योपायश्च। सिद्धोपायरूपेण साक्षात् भगवान् एव स्वीकृतः, साध्योपायरूपेण भक्तिः प्रतिपादिता। भगवतः सर्वप्रधानत्वं स्वीकृतमपि प्रपत्तेः स्वतन्त्रसाधनत्वं न निवारयति। प्रपत्तेः स्वतन्त्रोपायत्वं षोडशश्लोके[26] विशदतया प्रतिपादितम् ।

गीतायाः चरमश्लोके-

**सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।**

**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ।।[27]**

इति भगवद्वचनस्यापि प्रपत्तिपरकं विस्तृतार्थविवेचनमत्र द्रष्टुं शक्यते।

**उपायशब्दस्य तात्त्विकार्थः**

साध्यस्य वस्तुनः प्राप्तये यत् साधनं प्रयुज्यते तत् उपाय इति कथ्यते। भक्तौ साधनं भक्तिः, साध्यं तु भगवान्। प्रपत्तौ तु साध्यं भगवान् एव, साधनरूपेणापि भगवान् एव स्वीकृतः; तथापि प्रपत्तेः स्वतन्त्रसाधनत्वं सम्प्रदायसिद्धम्।

अतः सिद्धोपायस्य साध्योपायस्य च स्वरूपभेदः, तयोः परस्पर-सम्बन्धः, तयोः प्रयोजनभेदश्च अवगन्तव्यः। सप्तदशश्लोके[28] आचार्यवेदान्तदेशिकः उपायशब्दस्य तात्त्विकमर्थं विवृण्वन् सिद्धोपाय-साध्योपाययोः स्वरूपभेदं प्रकाशयति।

**प्रपत्तेरनुष्ठानविधिः**

पूर्वश्लोकेषु प्रपत्तेः स्वरूपं तदङ्गानि च निरूपितानि। केवलं तेषां ज्ञानं तु पर्याप्तं न भवति; अनुष्ठानमेव तस्य ज्ञानस्य प्रयोजनम्। अतः अष्टादशश्लोके[29] प्रपत्तेः अनुष्ठानविधिः प्रतिपाद्यते।

भक्तिर्यथा निरन्तरमनुष्ठेया, तथा प्रपत्तिः पुनः पुनरावर्तनीया न भवति। 'सकृत्' इत्यस्य एकवारमेव इत्यर्थः। अतः प्रपत्तेः सकृदनुष्ठानमेव शास्त्रसम्मतम्। प्रपत्तेः पुनरावृत्तौ तस्याः फलविषये संशयः स्यात्; अतः एकवारमेव विधिपूर्वकं कृतायाः प्रपत्तेः मोक्षफलजनकत्वं स्वीकृतम्।

**प्रपत्त्युत्तरकर्तव्यता**

प्रपत्तेः एकवारमनुष्ठानेन तस्याः तत्कालीनकृत्यं सम्पन्नं भवति; किन्तु ततः परं प्रपन्नस्य जीवनचर्या कथं भवेत् इति प्रश्नस्य समाधानं नवदशश्लोके क्रियते। प्रपत्त्यनन्तरमपि नित्यनैमित्तिककर्माणि अनुष्ठेयान्येव। सन्ध्यावन्दनादीनि नित्यकर्माणि परित्याज्यानि न भवन्ति।

काम्यकर्मसु भगवदनुकूलानि कर्माणि यथाशास्त्रं करणीयानि; निषिद्धकर्मणां तु सर्वथा त्यागः अपेक्षितः। देवतान्तरपरत्वं प्रपन्नस्य न युक्तम्, यतः तस्य परमाश्रयः भगवान् एव। भगवद्भक्तानां चातुर्विध्यं गीतायां प्रतिपादितम्-

**चतुर्विधाः भजन्ते मां जनाः सुकृतिनोऽर्जुन ।**

**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।।[30]**

अतः प्रपन्नस्य सर्वाभीष्टप्रार्थनायाः परमविषयः भगवान् एव भवति।

**प्रपन्नस्य भगवदाज्ञापालनम्**

प्रपन्नेन भगवदाज्ञाः सर्वथा परिपालनीयाः। आचार्यमुखेनापि भगवदाज्ञा प्राप्यते; अतः आचार्योपदिष्टानां नियमाचाराणां च श्रद्धापूर्वकं पालनं प्रपन्नस्य परमं कर्तव्यं भवति। पूर्वाचार्यैः प्रदर्शितः मार्ग एव प्रपन्नेन अनुसरणीयः। नूतनकल्पितानां स्वेच्छाचाराणां प्रवर्तनं सम्प्रदायानुकूलं न भवति।

प्रपन्नस्य कर्तव्येषु शक्यकर्तव्याशक्यकर्तव्ययोः विवेकोऽपि आवश्यकः। यत् स्वशक्त्या कर्तुं शक्यं तत् यथाशक्ति अनुष्ठेयम्; अशक्येषु तु अनावश्यकः प्रयासो न करणीयः। सर्वत्र पूर्वाचार्यपरम्परया प्रदर्शितस्य मार्गस्य अनुवर्तनमेव श्रेयस्करम्।

कर्मणां सञ्चितप्रारब्धभेदोऽपि अत्र विचारणीयः। अनेकजन्मसु सञ्चितानि कर्माणि सञ्चितकर्माणि; वर्तमानजन्मनि फलप्रदानाय प्रवृत्तानि कर्माणि प्रारब्धकर्माणि। प्रपत्त्यनुष्ठानेन सञ्चितकर्मणां विनाशः भवति, किन्तु प्रारब्धकर्माणि शरीरपातपर्यन्तं फलप्रदानाय प्रवर्तन्ते। प्रपन्नस्य आर्त-दृप्तभेदेन प्रारब्धकर्मणां फलभोगविषये विशेषोऽपि सम्प्रदायग्रन्थेषु प्रतिपादितः।

एवं प्रपन्नः प्रारब्धकर्मणां पुण्यापुण्यात्मकं फलमनुभूय शरीरपातानन्तरं भगवत्पादमूलं प्राप्नोति। दक्षिणायने मृतस्य प्रपन्नस्यापि अर्चिरादिमार्गेण भगवत्प्राप्तिः सम्भवतीति श्रीवैष्णव-सम्प्रदायस्य विशिष्टः सिद्धान्तः।

**प्रमाणपरम्परया प्रपत्तेः प्रतिष्ठापनम्**

पूर्वोक्तेषु श्लोकेषु आचार्यवेदान्तदेशिकेन प्रपत्तेः स्वरूपम्, तद्भेदाः, अङ्गानि, अनुष्ठानक्रमः, प्रपन्नस्य उत्तरकृत्यं च विवेचितम्। अन्तिमश्लोकेषु एते विषयाः नूतनकल्पिताः, न वा आचार्यस्य स्वेच्छया प्रतिपादिताः, अपि तु वेद-स्मृति-इतिहास-पुराण-आगम-पूर्वाचार्यपरम्परासु प्रतिष्ठिताः इति प्रमाणपूर्वकं प्रतिपाद्यते।

श्रीमद्रामायणम्, महाभारतम्, भगवद्गीता, पाञ्चरात्रम्, वैखानसागमाः, पुराणानि, दिव्यप्रबन्धाः तथा पूर्वाचार्यप्रणीतग्रन्थाश्च प्रपत्तितत्त्वस्य प्रमाणभूताः। विशेषतः श्रीवराहचरमश्लोकः, श्रीरामचरमश्लोकः, श्रीकृष्णचरमश्लोकश्च प्रपत्तेः स्वरूपं फलञ्च विशिष्टतया प्रकाशयन्ति।

अतः श्रीवेदान्तदेशिकाचार्येण पूर्वाचार्यपरम्परया प्राप्तानां सिद्धान्तानां सम्यगध्ययनं कृत्वा, वैदिक-स्मार्त-आगमिक-इतिहासपुराणादिप्रमाणानाम् अवगाहनपूर्वकं, भगवदनुग्रहविशेषेण च प्रपत्तितत्त्वस्य स्वरूपं व्यवस्थिततया न्यासविंशतौ निरूपितम्। अयं ग्रन्थः केवलं विंशतिश्लोकात्मकः स्तोत्रग्रन्थः न, अपि तु श्रीवैष्णवसम्प्रदायस्य प्रपत्तिसिद्धान्तस्य सङ्क्षिप्तं किन्तु गम्भीरं तात्त्विकप्रतिपादनमिव प्रतिभाति। अस्मिन् ग्रन्थे आचार्यस्वरूपात् आरभ्य प्रपत्त्यनुष्ठानपर्यन्तं तथा प्रपन्नस्य उत्तरजीवनचर्यायाः मोक्षपर्यन्तं सम्पूर्णः क्रमः अत्यन्तं सुनियोजितरूपेण उपनिबद्धः।

**संदर्भग्रन्थसूची**


1. विशिष्टाद्वैत वेदांत का विस्तृत विवेचन, स्वामी त्रिभुवनदास, चौखम्बा संस्कृत प्रतिष्ठान, जवाहरनगर बंगलो - २०१३
2. नारदभक्तिसूत्रम्, स्वामी हर्षानन्द पूरी (संस्कृतभाषायामुनवाद) डॉ एम. इ. रंगाचार्य रामकृष्णमठ बेंगलुरु - १९९३
3. श्रीमद्भगवदगीता (रामानुजभाष्यम्) ,चौखम्बा संस्कृत सीरीज, वाराणसी-२००८
4. स्तोत्ररत्नम् (वेदान्तदेशिकप्रणीतभाष्योपेतम्), डॉ केदारप्रसाद-परोहा, अमरग्रन्थ पब्लिकेशन, विजयनगर दिल्ली-२००४

5. विशिष्टाद्वैत कि आचार मीमांसा, डॉ. सुमनलता, परिमल पब्लिकेशन दिल्ली -२०००
6. श्रीमद्भागवतमहापुराण (द्वितीय खंड ) गीताप्रेस गोरखपुर
7. ईशादि नौ उपनिषद, गीताप्रेस गोरखपुर ,पन्द्रहवाँ पुनर्मुद्रण
8. यतीन्द्रमतदीपिका ,श्री निवासाचार्य व्याख्या, आचार्यशिवप्रसाद द्विवेदी, चौखम्भा सुरभारती प्रकाशन, वाराणसी, १९८९
9. मुण्डकोपनिषद् मध्वाचार्य रामकृष्णमठ, मद्रास-१९६०
न्यायसिद्धाञ्जनम्, वेदान्तदेशिक, टीका-नीलमेघाचारी, सम्पूर्णानन्द संस्कृत, विश्वविद्यालय, वाराणसी, १९६६
10. बाल्मीकिरामायणम्, महर्षि वाल्मीकि, गीताप्रेस गोरखपुर, १९८३
11. भगवद्रामानुजविरचितम्,शारीरकमीमांसाभाष्यम्(प्रथमसम्पुटः) प्रो.एम.ए.लक्ष्मीताताचार्यः, संस्कृत-संशोधन-संसत् (यादवाद्धिः), मेलुकोटे प्रथममुद्रणम् -१९५८
12. श्वेताश्वतरोपनिषद्, गीताप्रेस,गोरखपुर
13. पाद्मसंहिता (प्रथम भाग) , श्रीमती सीता नान्या तथा श्री र. न. सम्पन्न (संशोधक), पाञ्चरात्र परिशोधन परिषद् , तिरुवल्लिकेणि, मद्रास- शकाब्द १८९६
14. शेषसंहिता, श्रीनिवासाचार्य (संशोधक), श्रीमद्राजकीय शाखा-मुद्रालय, मैसूरु, प्रथम संस्करण १९३५

**पाद टिप्पणी**

[1] भगवद्बोधायनकृतां ब्रह्मसूत्रवृत्तिं पूर्वाचार्याः संक्षिक्षिपुः, तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते ।- प्रतिज्ञावाक्यम्, श्रीभाष्यम्

[2] पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिताम्।-श्रीभाष्यम्,द्वितीय-मङ्गलश्लोकांशः

[3] केवलकर्तव्यज्ञानं ह्यनुष्ठानफलम्।- श्रीरामानुजाचार्यः, श्रीमद्भगवद्गीताभाष्यम्, ४.१६

[4] न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविन्दे।
अकिञ्चनोऽनन्यगतिः शरण्य! त्वत्पादमूलं शरणं प्रपद्ये॥
स्तोत्ररत्नम्, २२

[5] मन्त्रं यत्नेन गोपयेत्। शेषसंहिता चतुर्दशोध्यायः, मन्त्रोपदेशः 31

[6] पाद्मसंहिता, चर्यापाद, २३.८१

[7] ओमित्येवं ध्यायथ आत्मानम् मुण्डकोपनिषत्, २.२.६
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं प्रणवत्तन्मयो भवेत् ।। मुण्डकोपनिषत्, २.२.४

[8] आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासः गोमृत्ववरणं तथा ।
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।।
अहिबुध्न्यसंहिता अध्याय ३७ श्लोक २८-२९

[9] भिन्ननावाश्रितः स्तब्धः यथापारं न गच्छति ।
ज्ञानहीनं गुरुं बद्ध्वा कुतो मोक्षमवाप्नुयात्।।
शेषसंहिता चतुर्दशोध्यायः मन्त्रोपदेशः 6

[10] स्तोत्ररत्नंभाष्यम्(वेदान्तदेशिकप्रणीतभाष्योपेतम्) श्लोक संख्या 1

[11] श्वेताश्वतरोपनिषद् ६.२३

[12] सद्बुद्धिः साधुसेवी समुचितचरितस्तत्त्वबोधाभिलाषी
शुश्रूषुस्त्यक्तमानः प्रणिपतनपरः प्रश्नकालप्रतीक्षः ।
शान्तो दान्तोऽनसूयुः शरणमुपगतः शास्त्रविश्वासशाली
शिष्यः प्राप्तः परीक्षां कृतविदभिमतं तत्त्वतः शिक्षणीयः ।।-
न्यासविंशतिः-3

[13] बृहदारण्यकोपनिषद् (2.4.5)

[14] तैलधारावदवच्छिन्नस्मृतिसन्तानरूपा भक्तिः।
न्यायसिद्धाञ्जनम्, जीवपरिच्छेदः, मोक्षहेतुनिरूपणम्

[15] सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतत् व्रतं मम ।।
वाल्मीकि रामायण, युद्धकाण्ड १८.३२

[16] मोक्षोपायार्हतैवं भवति भवभृतां कस्यचित् क्वापि काले
तद्वद् भक्तिप्रपत्त्योरधिकृतिनियमस्तादृशा स्यान्नियत्या ।
शक्ताशक्तादितत्पुरुषविषयतः स्थाप्यते तद्व्यवस्था
यच्चाहुस्तद्विकल्पः सम इति कतिचित् तत् फलस्याविशेषात् ।।
न्यासविंशतिः-5

[17] सानुक्रोशे समर्थे प्रपदनमृषिभिः स्मर्यतेऽभीष्टसिद्ध्यै
लोकेऽप्येतत् प्रसिद्धं न च विमतिरिह प्रेक्ष्यते क्वापि तन्त्रे ।
तस्मात् कैमुत्यसिद्धं भगवति तु भरन्यासविद्यानुभावं
धर्मस्थेयाश्च पूर्वे स्वकृतिषु बहुधा स्थापांञ्चक्रुरेवम् ।।
न्यासविंशतिः-6

[18] शास्त्रप्रामाण्यवेदी ननु विधिविषये निर्विशङ्कोऽधिकारी
विश्वासस्याङ्गभावे पुनरिह विदुषा किं महत्त्वं प्रसाध्यम्।
मैवं घोरापराधैः सपदि गुरुफले न्यासमात्रेण लभ्ये
शङ्का पार्ष्णिग्रहार्हा शमयितुमुचिता हेतुभिस्तत्तदर्हैः ।।
न्यासविंशतिः- 7

[19] नेहाभिक्रान्तिनाशो न च विहतिरिह प्रत्यवायो भवेदि-
त्युक्तं कैमुत्यनीत्या प्रपदनविषये योजितं शास्त्रविद्भिः ।
तस्मात् क्षेत्रे तदर्हे सुविदितसमयैर्देशिकैः सम्यगुप्तं
मन्त्राख्यं मुक्तिबीजं परिणतिविशतः कल्पते सत्फलाय ।।
न्यासविंशतिः- 8

[20] नाना शब्दादिभेदादिति तु कथयता सूत्रकारेण सम्यक्
न्यासोपासे विभक्ते यजनहवनच्छब्दभेदादभाक्तात् ।
आख्यारूपादिभेदः श्रुत इतरसमः, किं च भिन्नोऽधिकारः
शीघ्रप्राप्त्यादिभिःस्याज्जगुरिति च मधूपासनादौव्यवस्थाम् ।।
न्यासविंशतिः 10

[21] आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।
रक्षिष्यतीति विश्वासः गोमृत्ववरणं तथा ।
आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः।
अहिबुध्न्यसंहिता अध्याय ३७ श्लोक २८-२९

[22] पञ्चाप्यङ्गान्यभिज्ञाः प्रणिजगुरविनाभावभाञ्जि प्रपत्तेः
कैश्चित् संभावितत्वं यदिह निगदितं तत् प्रपत्त्युत्तरं स्यात्।
अङ्गेष्वङ्गित्ववादः फलकथनमिह द्वित्रिमात्रोक्तयश्च
प्राशस्त्यं तत्र तत्र प्रणिदधति ततः सर्ववाक्यैककण्ठ्यम् ।।
न्यासविंशतिः-12

[23] भक्तिप्रपत्तिभ्यां प्रसन्नः स एवोपायः।–
प्रतिज्ञावाक्येष्वेकम्, यतीन्द्रमतदीपिका

[24] रक्षापेक्षा स्वसाह्यप्रणयवति भरन्यास आज्ञादिदक्षे
दृष्टा नात्र प्रपत्तिव्यवहृतिरिह तन्मेलने लक्षणं स्यात् ।
गेहागत्यादिमात्रे निपततु शरणागत्यभिख्योपचारात्
यद्वाऽनेकार्थभावाद् भवति हि विविधः पालनीयत्वहेतुः ।।
न्यासविंशतिः -13

[25] आत्मात्मीयस्वरूपन्यसनमनुगतं यावदर्थं मुमुक्षोः
तत्त्वज्ञानात्मकं तत् प्रथममथ विधेः स्यादुपाये समेतम् ।
कैङ्कर्याख्ये पुमर्थेऽप्यनुषजति तदभ्यर्थहेतुभावात्
स्वाभीष्टानन्यसाध्यावधिरिह तु भरन्यासभागोऽङ्गिभूतः ।।
न्यासविंशतिः- 14

[26] आदेष्टुं स्वप्रपत्तिं तदनुगुणगुणाद्यन्वितं स्वं मुकुन्दो
मामित्युक्त्वेकशब्दं वदति तदुचितं तत्र तात्पर्यमूह्यम् ।
तत् प्राप्यप्रापकैक्यं सकलफलदतां न्यासतोऽन्यानपेक्षां
प्राधान्याद्यं च किञ्चित् प्रथयति स परं श्रीसखे मुक्त्युपाये ।।
न्यासविंशतिः- 16

[27] श्रीमद्भगवद्गीता १८.६६

[28] स्वाभीष्टप्राप्तिहेतुः स्वयमिह पुरुषैः स्वीकृतः स्यादुपायः
शास्त्रे लोके च सिद्धः स पुनरुभयथा सिद्धसाध्यप्रभेदात् ।
सिद्धोपायस्तु मुक्तौ निरविधिकदयः श्रीसखः सर्वशक्तिः
साध्योपायस्तु भक्तिर्न्यसनमिति पृथक् तद्वशीकारसिद्ध्यै ।।
न्यासविंशतिः- 17

[29] अत्यन्ताकिञ्चनोऽहं त्वदपचरणतः सन्निवृत्तोऽद्य नाथ
त्वत्सेवैकान्तधीः स्याम् त्वमसि शरणं इत्यध्यवस्यामि गाढाम् ।
त्वं मे गोपायिता स्यास्त्वयि निहितभरोऽस्म्येवम् अत्यर्पितात्मा
यस्मै स न्यस्तभारः सकृदथ तु सदा न प्रयस्येत् तदर्थम् ।।
न्यासविंशतिः- 18

[30] श्रीमद्भगवद्गीता ७.१